This Question Paper consists of 42 questions and 11 printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवं 11 मुद्रित पृष्ठाः सन्ति।

**Code No. 65/S/A/S**
कोड नं॰

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Set / सेट** A

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination ..............................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..............................................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..............................................................................

***सामान्य अनुदेशाः —***

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्ष्यणीयम्।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु किमपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तरपुस्तिकामध्ये लिखेत्।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड नं. 65/S/A/S, सेट A अवश्यमेव लेखनीया।

## SANSKRIT
## संस्कृतम्
## (209)

समयः — होरात्रयम् ] [ पूर्णाङ्काः — 100

**निर्देशाः** — (i) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति।

(ii) प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

### खण्ड—क

**1.** कालान्तरे बोपदेवः महान् ______ अभवत्। 1

(A) वैज्ञानिकः (B) नीतिज्ञः

(C) दैवज्ञः (D) विद्वान्

**2.** कोऽपि जीवः कं विना न जीवति? 1

(A) हृदयम् (B) मित्रम्

(C) ज्ञानम् (D) प्राणम्

**3.** प्राणानां गमनकाले इन्द्रियाणि कीदृशानि भवन्ति? 1

(A) पीडितानि (B) रुष्टानि

(C) प्रसन्नानि (D) जीवितानि

**4.** मत्स्यत्रयेषु भाग्यवादी कः आसीत्? 1

(A) अनागत विधाता (B) यद्भविष्यः

(C) प्रत्युत्पन्नमतिः (D) चिरकारी

**5.** शक्रः कीदृशं रथम् अधिरुह्य योद्धुं गतवान्? 1

(A) सुसज्जितम् (B) ससैन्यम्

(C) हैमम् (D) भासुरम्

**6.** 'आर्यभटीयम्' इति प्रसिद्ध ग्रंथः केन रचितः? 1

(A) ब्रह्मगुप्तेन (B) दुर्गदेवेन

(C) आर्यभटेन (D) मुंजालेन

**7.** शौचं कतिविधं स्मृतम्? 1

(A) पंचविधम् (B) चतुर्विधम्

(C) त्रिविधम् (D) षड्विधम्

**8.** अहम् अभ्यासेन विषयान् अवगमिष्यामि—इत्यत्र 'अवगमिष्यामि' इति क्रियापदे कः लकारः? 1

(A) लङ् (B) लट्

(C) लोट् (D) लृट्

**9.** न भवद्भ्यां सम्यक् मंत्रितम्—इत्यत्र 'भवद्भ्याम्' इति पदस्य मूलशब्दः कः? 1

(A) भव

(B) भवत्

(C) भवान्

(D) भवन्

**10.** सर्वतः _____ आदद्यात्। 1

(A) सारम्

(B) संसारम्

(C) विहारम्

(D) संहारम्

**11.** (क) रामः शबरीं कुत्र दृष्टवान्?

(ख) तत्र सः कं हतवान्? 1+1=2

**12.** (क) प्राणात्ययेऽपि कः स्ववृत्तिं न त्यजति?

(ख) पारदभस्मना किं विधातुं शक्यते? 1+1=2

**13.** (क) कः पृष्ठम् आरूढं वानरं सुखेन नयति?

(ख) देवेन्द्रस्य रथं विलोक्य के भयाकुलाः अभवन्? 1+1=2

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत— 1×3=3

(कोकिलरवं सूचयित्वा)

कण्वः : कोकिलस्वरेण वृक्षैः अनुमतिः प्रदत्ता।

शकुन्तला : आश्रमपदं परित्यजन्त्याः मे चरणौ दुःखेन पुरतः प्रवर्तेते।

प्रियम्वदा : न केवलं तपोवनविरहकातरा सखी एव। त्वया उपस्थितवियोगस्य तपोवनस्य अपि तावत् समवस्था दृश्यते।

पश्य

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा, मुञ्चन्त्यश्रूणीव लताः॥

शकुन्तला : तात, लताभगिनीं वनज्योत्स्नाम् आमन्त्रयिष्ये। वनज्योत्स्ने! प्रत्यालिङ्ग मां शाखाबाहुभिः। अद्यप्रभृति दूरपरिवर्तिनी भविष्यामि। हला अनसूये! एषा द्वयोर्युवयोः ननु हस्ते निक्षिप्ता।

**प्रश्नाः**—

(क) वृक्षैः पतिगृहं गमनाय शकुन्तलायै केन अनुमतिः प्रदत्ता?

(ख) अपसृतपाण्डुपत्राः काः सन्ति?

(ग) शकुन्तला वनज्योत्स्नां कैः प्रत्यालिङ्गनाय संबोधयति?

**15.** कस्यचित् **एकस्य** चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत— 1×5=5

चन्द्रकेतुः ; लवः।

**16.** प्रश्नान् उत्तरत— 1+1=2

(क) पिता कस्मात् उच्चतरः?

(ख) तक्रं कस्य अन्ते पेयम्?

**17.** (क) वायोः शीघ्रतरं किम्?

(ख) द्रुमः कति पुत्रसमः भवति? 1+1=2

**18.** मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ॥

(क) सर्वाणि भूतानि मां कस्य चक्षुषा समीक्षन्ताम्?

(ख) सर्वः सर्वान् प्रति कथं व्यवहरेत्? 1+1=2

**19.** जीवनं सर्वप्राणिनां जलाशयसुनिर्भरम्।
संरक्ष्य वर्धनीयं च जलं रक्षति रक्षितम्।।

(क) सर्वप्राणिनां सुनिर्भरं किम्?

(ख) किं संरक्ष्यं वर्धनीयं च? 1+1=2

**20.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत— 1×3=3

आत्मवत् सर्वभूतानि पश्यतोऽस्य पदानुगाः।
गुणैः परवशीभूताः व्यवर्धन्त सहस्रशः॥

(क) कः आत्मवत् सर्वभूतानि अपश्यत्?

(ख) पदानुगाः इति पदस्य कः अर्थः?

(ग) केन कारणेन गाँधिनः अनुयायिनः व्यवर्धन्त?

**21.** निम्नलिखितश्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत— 1×3=3

अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥

**अन्वयः —**

अपदः दूरगामी च ______ पण्डितः च न, अमुखः स्फुटवक्ता च यः ______ स ______ ।

**22.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत— 1+1=2

(क) ते श्वः प्रभाते मत्स्य संक्षयं करिष्यन्ति।

(ख) एतत् मम मनसि वर्तते।

**23.** कः कं प्रति कथयति? 1+1=2

(क) सत्यमैक्ष्वाकः खल्वसि।

(ख) एकस्तावदयं वीरपुरुषः पूजितो भवति?

**24.** (क) कीदृशं दानं सात्त्विकं कथ्यते?

(ख) कैः सह केन भावेन वर्तितव्यम्? 1+1=2

**25.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत— 1×3=3

बलं सर्वबलेभ्योऽपि सत्यमेवातिरिच्यते।
सत्यवानबलः श्रेयान् सबलात् सत्यवर्जितात्॥

(क) सर्वबलेभ्यः अपि किं बलम् अतिरिच्यते?

(ख) सबलः अपि सत्यरहितः जनः किं न लभते?

(ग) सम्मानं कः लभते?

**26.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत— 1×3=3

युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः।
स्त्रियमापद्गतां रक्षेत् चतुः शिक्षेत कुक्कुटात्॥

(क) प्रातः उत्थानं कस्य गुणः अस्ति?

(ख) कुक्कुटः कैः सह भोजनं करोति?

(ग) कुक्कुटवत् नियमपालनेन मनुष्यः कीदृशः नागरिकः भवति?

**27.** कस्यचित् **एकस्य** पाठस्य सारांशं पञ्चवाक्येषु लिखत— 1×5=5

(क) यद्भविष्यो विनश्यति

(ख) कर्त्तव्यनिष्ठा

(ग) करुणापरा हि साधवः

## खण्ड—ख

### ( अनुप्रयुक्तव्याकरणम् )

**28.** अधोलिखितेषु मूर्धन्यवर्णौ चित्वा लिखत— 1+1=2

क; ट; त; र; ह; च।

**29.** रेखाङ्कितेषु सन्धिच्छेदं कृत्वा सन्धिनाम लिखत— 1×3=3

दृश्यतेऽसौ जनस्थाने श्रीमान् सीते वनस्पतिः।
जटायुश्च महातेजाः तव हेतोर्विलासिनि॥

**30.** सन्धिं कुरुत— 1+1=2

शीत + उष्णम् ; स्यात् + एवम् ।

**31.** रेखाङ्कितशब्दयोः कः मूलशब्दः का च विभक्तिः? 1+1=2

अशक्तैः बलिनः शत्रोः किं कर्त्तव्यम्?

**32.** रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकानि लिखत— 1×3=3

(क) तडागे (4) मत्स्याः वसंति।

(ख) (1) बालिका नृत्यति।

(ग) (4) आयुर्विद्या यशोबलानि तस्य वर्धन्ते।

**33.** रेखाङ्कितपदयोः कः धातुः कश्च लकारः? 1+1=2

(क) निहन्ति गन्धं वैरस्यं जिह्वादन्तास्यजं मलम्।

(ख) पापं समाचरति वीतघृणो जघन्यः।

**34.** रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः? 1+1=2

प्राणात्ययेऽपि साधुजनः स्ववृत्तिं न लंघयति।

**35.** अधोलिखितयोः समस्तपदयोः विग्रहं लिखत— 1+1=2

उपनगरम् ; प्रजारक्षकः ।

**36.** अधोलिखितविग्रहाणां कृते समस्तपदं लिखत— 1+1=2

(क) सहस्रं छिद्रं यस्मिन् तत् ।

(ख) आत्मनः विनिग्रहः ।

**37.** रिक्तस्थाने किं पदं भविष्यति? 1+1=2

(क) तत्र शीघ्रं ______ । (गम् + तव्यत्)

(ख) ते ______ गतवन्तः । (पठ् + क्त्वा)

**38.** रिक्तस्थानपूर्तिं कुरुत— 1×3=3

(क) ______ कार्याणि सिध्यन्ति। (उद्योग)

(ख) जम्बुवृक्षः ______ पूरितः आसीत्। (फल)

(ग) कण्वः ______ निवसति। (आश्रम)

## खण्ड—ग

### ( रचनाकौशलम् )

**39.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत— 1×5=5

जन्मनः पंचमे सप्तमे वा वर्षे प्रायः विद्यारंभः क्रियते। ततः षोडशवर्षपर्यन्तं विद्याध्ययनं क्रियते। इयम् अवधिः 'छात्रजीवनम्' कथ्यते। छात्रजीवने पूर्णनिष्ठया विद्याध्ययनं क्रियते। इयं कालावधिः तपस्याकल्पा वर्तते। छात्रजीवने मातापित्रोः आश्रये वसन्तः छात्राः सर्वविधचिन्ता विनिर्मुक्ताः भवन्ति। सर्वे तेषु स्निह्यन्ति। सर्वे ते परिश्रमेण विद्यार्जनं कुर्वन्ति। अध्ययनकाले विद्यार्थिनः सावधानाः भवेयुः।

**प्रश्नाः—**

(क) विद्यारंभः कदा क्रियते?

(ख) विद्याध्ययनस्य अवधिः किं कथ्यते?

(ग) सर्वविधचिंतामुक्ताः कदा भवन्ति जनाः?

(घ) विद्यार्थिनः सावधानाः कदा भवेयुः?

(ङ) वसन्तः इति पदं कस्य पदस्य विशेष्यम्?

**40.** अधोलिखितविषयमधिकृत्य मञ्जूषा-पदसहायतया एकम् अनुच्छेदं लिखत— 5

सदाचारः

| **मञ्जूषा** |
|---|
| कथ्यते सताम् आचारः, सज्जनाः यथा आचरन्ति सः सदाचारः, अहिंसा, सत्यम्, दया, क्षमा, परोपकारः, इत्यादीनि सदाचार एव मन्यते सदाचारी सर्वत्र आदरं प्राप्नोति, आयुः वर्धते— आचारः परमो धर्मः |

**41.** भवान् शशांकः। परीक्षायां प्रथमस्थानोपलब्धये भ्रात्रे एकं पत्रं, मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा, लिखतु— 1×5=5

दिल्लीतः

तिथिः ................

प्रिय अनुज,

शुभाशीर्वादाः

माध्यमिकपरीक्षायां प्रथमस्थानं प्राप्य __(i)__ अस्माकं __(ii)__ अनेकशः __(iii)__ आशीर्वादाः च। भविष्येऽपि एवमेव __(iv)__ कृत्वा सफलतां प्राप्नुयाः इति मम __(v)__ ।

तव भ्राता

शशांकः

| **मञ्जूषा** |
|---|
| सफलतायै, पक्षतः, वर्धापनानि, परिश्रमम्, कामना |

**42.** अधोलिखितं चित्रं दृष्ट्वा मञ्जूषा-पदसहायतया पञ्चवाक्यानि संस्कृतेन लिखत— 1×5=5



**मञ्जूषा**

अत्र, मेलकस्य दृश्यम् अस्ति, जनाः बालकाः महिलाः भ्रमन्ति, मिष्टान्नं क्रीत्वा खादन्ति, वंशीविक्रेता वंशीं वादयति, बालकेभ्यः क्रीडनकानि विक्रीयन्ते।

★ ★ ★